कक्षा 10

RBSE BOARD ZONE

# PREVIOUS YEAR QUESTIONS


## CHAPTER-WISE



# संस्कृत

## राजस्थान बोर्ड में पिछले 12 वर्षों में पूछे गए सभी प्रश्न

- AVAILABLE FOR ENGLISH & HINDI MEDIUM
- Based on Rationalised NCERT 2023-24
- QUESTIONS FROM 2013-2024
- FOR RBSE EXAMINATION 2025




Maniesh Kr Sah

921-6765-400


© BOARDZONE.IN ALL RIGHTS RESERVED

# विषय - वस्तु

## अध्याय पृष्ठ संख्या


1. **अपठितावबोधनम् ---------- 02-09**
2. **रचनात्मकं कार्यम् ---------- 10-33**
   (i) पत्रलेखनम् ---------- 10-13
   (ii) चित्राधारितं वर्णनम् ---------- 13-20
   (iii) संकेताधारितं वार्तालापलेखनम् ---------- 21-26
   (iv) संकेताधारितम् अनुच्छेदलेखनम् ---------- 26-28
   (v) अनुवादकार्यम् ---------- 29-30
   (vi) घटनाक्रमस्य संयोजनम् ---------- 31-33
3. **अनुप्रयुक्त-व्याकरणम् ---------- 34-54**
   (i) संधि: ---------- 34-37
   (ii) समास: ---------- 37-39
   (iii) कारकाणि ---------- 39-41
   (iv) प्रत्यया: ---------- 42-44
   (v) अव्ययपदानि ---------- 44-47
   (vi) उपसर्गा: ---------- 47-48
   (vii) शब्दरूपाणि ----------48-48
   (viii) धातु रूपाणि: ---------- 48-49
   (ix) संख्याज्ञानम् ---------- 49-49
4. **पाठ्यपुस्तकात् गद्यांशः ---------- 50-51**
5. **पाठ्यपुस्तकात् पद्यांश: ---------- 52-54**
6. **पाठ्यपुस्तकात् नाट्यांशः ---------- 55-56**
7. **पाठ्यपुस्तकात् प्रश्नाः ---------- 57-63**

# अपठितावबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत — [4M]

संसारे कस्यापि देशस्य समृद्धिः जनसंख्यानियमनेन एव सम्भवति । यदा देशे भोक्तृणां संख्या स्वल्पीयसी भवति, तदा साधनानां बहुलतया सर्वत्र सम्पन्नता दृश्यते । परन्तु यदा उपभोक्तृणां संख्या समधिका जायते, तदा साधनानां स्वल्पतया सर्वत्र अभावः अनुभूयते । जनानां मनस्सु अशान्तिः उत्पद्यते, देशस्य च अवनतिः भवति । अतः देशस्योत्रत्यै जनसंख्या-साधनयोः द्वयोः सन्तुलनम् अपेक्षितं भवति ।

(क) एकपदेन उत्तरत —

(i) देशस्य समृद्धिः केन प्रकारेण सम्भवति ?

(ii) देशस्योगत्यै कयो : द्वयो : सन्तुलनम् अपेक्षितं भवति ?

(ख) जनसंख्यावृद्ध्या देशे केषां स्वल्पतया सर्वत्र अभावः अनुभूयते ? ( पूर्णवाक्येन उत्तरत )

(ग) निर्देशानुसारम् उत्तरत —

(i) 'भवति' इति पदं लोट् लकारे परिवर्त्य लिखत ।

(ii) 'देशस्योन्नत्यै' इति पदस्य सन्धि-विच्छेदं कृत्वा लिखत ।

(iii) "चेत:" इत्यस्य पदस्य पर्यायवाचिशब्दं लिखत ।

(iv) 'जनानां मनस्सु अशान्तिः उत्पद्यते' अत्र 'उत्पद्यते' पदस्य कर्तृपदं लिखत ।

(RBSE 2013)

2. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं लिखत [4M]

सायंकाले अस्ताचलं प्रति गच्छन् भगवान् सूर्यः चिन्तितः अभवत् - "मयि गते सम्पूर्ण संसारः अन्धकारे निमग्नः भविष्यति । लोकानां व्यवहारः कथं चलिष्यति ? मां विना सर्वे जीवाः दुःखम् अनुभविष्यन्ति ।" तस्य एतं भावं विज्ञाय एकः लघुदीपः सविनयं निवेदितवान् - "भगवान् ! अलं चिन्तया । यद्यपि मम प्रकाशः क्षीणः तथापि जनानां सेवायाम् अहं यथाशक्तिः स्वजीवनं समर्पयिष्यामि, कार्याणि च साधयिष्यामि ।

(क) एकपदेन उत्तरत –

(i) अस्ताचलं प्रतिः गच्छन् कः चिन्तितः अभवत् ?

(ii) सूर्यं विना सर्वे जीवाः किम् अनुभविष्यन्ति ?

(ख) पूर्णवाक्येन उत्तरत —

सूर्यस्य भावं विज्ञाय लघुदीपः किं निवेदितवान् ?

(ग) निर्देशानुसारम् उत्तरत —

(i) उपर्युक्त गद्यांशे 'सुखम्' इति पदस्य विलोमं किम् ?

(ii) "मां विना सर्वे जीवा:-" अत्र 'मां' इति सर्वनामपदम् कस्मै प्रयुक्तम् ?

(iii) 'लघुदीप:' अत्र विशेषणपदं किम् ?

(iv) 'जनानां सेवायाम् अहं यथाशक्ति स्वजीवनं समर्पयिष्यामि' अत्र कर्त्ता क: ?

(RBSE 2015)

3. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत [4M]

गंगानदी भारतस्य पवित्रतमा नदी। यमुनानदी अपि पूज्या नदी अस्ति। सरस्वतीनदी लुप्ता अभवत् इति जनानां विश्वासः। उत्तरप्रदेशस्य प्रयागनगरम् एतासां तिसृणां नदीनां संगमे तिष्ठति। कावेरी, तुंगभद्रा, गोदावरी, नर्मदा, चर्मण्वती, कृष्णा भारतस्य प्रसिद्धाः नद्यः सन्ति। नदीनां संगमेषु अस्माकं तीर्थस्थानानि सन्ति। जनाः तासु नदीषु स्नात्वा, मन्दिराणां दर्शनं च कृत्वा हर्षम् अनुभवन्ति।

(क) एकपदेन उत्तरत-

(i) का नदी लुप्ता अभवत्?

(ii) कुत्र अस्माकं तीर्थस्थानानि सन्ति?

(ख) पूर्णवाक्येन उत्तरत—

(i) प्रयागनगरं कुत्र तिष्ठति?

(ग) निर्देशानुसारम् उत्तरत-

(i) उपर्युक्त गद्यांशे 'अपूज्या' इति पदस्य विलोमपदं लिखत।

(ii) 'जनाः हर्षम् अनुभवन्ति' अस्मिन् वाक्ये कर्त्ता कः?

(iii) 'गंगानदी पवित्रतमा' इत्यत्र विशेषणपदं किम्?

(iv) 'भारतस्य नद्यः सन्ति'। अत्र क्रियापदं लिखत।

(RBSE 2016)

4. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत - [4M]

स्वस्था: छात्रा: समये उत्तिष्ठन्ति, समये निद्रां सेवन्ते, समये पटन्ति, समये क्रीडन्ति पर्यटन्ति च । ते कदापि धूम्रपानं, नाधिकं चायपानं मद्यपानं वा सेवन्ते । ते अधिकं दूरदर्शनमपि न पश्यान्ति । समयस्य सदुपयोगं कुर्वन्ति । श्रेष्ठजनसंगतौ एव निवसन्ति । एतादृशा: छात्रा एवं नीरोगा:, दीर्घजीविन:, राष्ट्रभक्ता: देशजनानुरागिणश्च भवन्ति । अत: सुस्वास्थ्यमेव जीवनस्य सर्वश्रेष्ठधनं विद्यते ।

(क) एकपदेन उत्तरत -

(i) समयस्य सदुपयोगं के कुर्वन्ति ?

(ii) जीवनस्य सर्वश्रेष्ठधनं किम् अस्ति ?

# रचनात्मकं कार्यम्

## पत्रलेखनम्

1. भवती अहमदाबाद-नगरस्य उमा नामक छात्रा अस्ति । भवत्याः सखीं प्रीतिं प्रति एकं पत्रं लिखतु यस्मिन् भवत्या: 'विद्यालये आयोजितस्य वार्षिकोत्सवस्य' वर्णनं स्यात् । [4M]
(RBSE 2013)

2. भवान् प्रत्यूषः । भवतां राजकीय आदर्श उच्चमाध्यमिक विद्यालये संस्कृत सम्भाषण शिविरम् आयोजितमासीत् । स्वानुभवान् वर्णयन् भवान् स्वमित्रं भव्यं प्रति पत्रं लिखत । [4M]
(RBSE 2015)

3. भवती रेखा। भवत्याः राजकीय-आदर्श-उच्चमाध्यमिक-विद्यालये स्वच्छतादिवसः समायोजितः आसीत्। विषयेऽस्मिन् एकं पत्रं स्वमित्रं प्रति लिखत। [4M]
(RBSE 2016)

4. भवान् सुरेन्द्रः । स्वकीयं मित्रं महावीरं प्रति एकं पत्रं लिखत यस्मिन् शैक्षिकभ्रमणस्य वर्णनं स्यात् । [4M]
(RBSE 2017)

5. भवान् राजकीय — आदर्श — उच्च माध्यमिक विद्यालय कञ्चनपुरस्य दशम्याः कक्षायाः छात्रः सोमनाथः अस्ति । स्वविद्यालयस्य प्रधानाचार्याय आवश्यक कार्यवशात् पञ्चदिनस्य अवकाशार्थं प्रार्थनापत्रं लिखत। [4M]
(RBSE 2018)

6. भवान् राजकीयमाध्यमिक विद्यालय सुन्दर नगरस्य दशम्या कक्षायाः छात्रः नरेन्द्रः अस्ति। स्व विद्यालयस्य प्रधानाध्यापकाय अस्वास्थ्य कारणेन अवकाशार्थं प्रार्थना पत्रं लिखतु। [4M]
(RBSE 2019)

7. भवान् राजकीय माध्यमिक विद्यालयः, राहोली इत्यस्य दशम्याः कक्षायाः छात्रः सुरेशः अस्ति । स्वविद्यालयस्य प्रधानाध्यापकाय भ्रातुः विवाहे उपस्थातुं दिनद्वयसस्य अवकाशार्थं प्रार्थनापत्रं लिखतु । [4M]

**अथवा**

भवान् विद्यालयस्य नियमित छात्र प्रमाणपत्र प्राप्ति विषये अधोलिखित पत्रं मञ्जूषासहायतया रिक्तस्थानानि पूरयित्वा लिखतु

| भवन्तः, अहं, महोदयाः, मह्यं |
|---|
| प्रदाय, अतः, सेवायाम्, भागं |

...............

श्रीमन्तः प्रधानाध्यापक महोदयाः,
राजकीय माध्यमिक विद्यालयः
धौलपुरम्

विषय :- नियमित छात्र प्रमाणपपत्र प्राप्त्यर्थम्।

# संकेताधारितं वार्तालापलेखनम्

1. मञ्जूषातः उचितानि घदानि गृहीत्वा 'धूम्रपान-निवारणाय' इति विषये गुरुशिष्ययोः संवादं [4M]

| गन्तुम् , अस्य, तुभ्मं, धूम्रपानं, स्वास्थ्य, प्रेरणीयाः, मया, दुर्व्यसनस्य । |
|---|

सोहनः — गुरुवर ! अहं पश्यामि विद्यालये केचन छात्रा ..........कुर्वन्ति ।
गुरुः — वत्स ! धूम्रपानं ..........विनाशकमस्ति ।
सोहनः — गुरुवर ! कोऽस्य.......... निवारणोपायः ।
गुरुः — पुत्र ! जन-जागर्तिरेव ..........दुर्व्यसनस्य निवारणोपायः ।
सोहनः — गुरुवर ! .......... किं करणीयम् ?
गुरुः — त्वया छात्राः ..........यत् अस्माभिः धूम्रपानं न करणीयम् ।
सोहनः — गुरुवर ! एवमेव करोमि । अधुना अहं इ..........च्छामि
गुरुः - वत्स ! महत्त्वपूर्ण विषयोपरि वार्तां कर्तुं ..........धन्यवादं ददामि ।

(RBSE 2013)

2. मञ्जूषातः उचितानि पदानि चित्वा द्वयोः सख्योः संवादं पूरयत — [4M]

| स्थानान्तरणवशात् , कक्षायाम् , तव, विद्यालयात् , वससि, आगता, अहं, नवमकक्षा । |
|---|

मेघा — स्वागतं ते अस्यां..........।
सुधा — धन्यवादाः
मेघा - प्रियसखि ! किं ..........नाम ?
सुधा - मम नाम सुधा अस्ति ।
मेघा - सुधे ! कस्मात् ..........आगता असि ?
सुधा - अहं जयपुर नगरस्य केन्द्रीय विद्यालयात् आगता अस्मि
मेघा - अहमपि.......... पर्यन्तं तत्रैव अपठम् । पितुः ..........अत्र आगता ।
सुधा — अहमपि अनेनैव कारणेन अत्र ...............।
मेघा — अधुना त्वं कुत्र.......... ?
सुधा - अधुना.......... जवाहरनगरे वसामि ।

(RBSE 2015)

# पाठ्यपुस्तकात् गद्यांशः

1. अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषायाम् अनुवादं कुरुत - [3M]

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत् । 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कश्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

**अथवा**

"भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति । इतरमिव धुरं वोढुं सः न शक्नोति । एतत् भवान् पश्यति न? इति प्रत्यवोचत् ।

(RBSE 2022)

2. 'बुद्धिर्बलवती सदा' इति कथायाः सारं हिन्दीभाषायां लिखत। [2M]
(RBSE 2022, 2023)

3. अधोलिखितस्य पठितगद्यांशस्य हिन्दी भाषायां सप्रसंगम् अनुवादं लिखत - [4M]

वनस्य दृश्यं समीपे एवैका नदी वहति । एकः सिंहः सुखेन विश्राम्यति, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति । क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारुढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।

**अथवा**

भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् । सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् -
"अयि शुभे ! किमेवं रोदिषि?"
"'भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।"

(RBSE 2023)

4. "जननी तुल्य वत्सला" इति पाठसारं हिन्दीभाषायां लिखंत। [2M]
(RBSE 2024)

5. अधोलिखित गद्यांशं पठित्वा एतदाधारितर्प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत। [4M]

यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते । प्रकृतिसमक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव, तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माण न करणीयम् । तटबन्धं निर्माय बृहन्मात्रं नदीजलमपि नैकस्मिन् स्थले पुञ्जीकरणीयम् अन्यथा असन्तुलन वशादभूकम्पः सम्भवति । वस्तुतः शान्तानि एव पञ्चतत्त्वानि क्षितिजलपावकसमीरगगनानि भूतलस्य योगक्षेमाभ्यां कल्पन्ते। अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति।

(क) एकपदेन उत्तरं लिखत। [1]

# पाठ्यपुस्तकात् नाट्यांशः

1. अधोलिखितस्य नाट्यांशस्य सप्रसङ्गं हिन्दीभाषायाम् अनुवादं लिखत - [3M]

राम: - एष भवतो: सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि - क्षत्रियकुलपितामहयो: सूर्यचन्द्रयो: को वा भवतोर्वंशस्य कर्त्ता?
लव: - भगवान् सहस्त्रदीधिति: ।
राम: - कथमस्मत्समानाभिजनौ संवृत्तौ?
विदूषक: - किं द्वयोरणप्येकमेव प्रतिवचनम्?
लव: - भ्रातरावावां सोदर्यों ।

**अथवा**

मयूर: - अरे वानर ! तूष्णीं भव । कथं त्वं योग्य: वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं

पक्षिराज: कृत:, अत: वने निवसन्तं मां वनराजरूपेणापि द्रक्षं सजा: भवन्तु अधुना । यत: कथं कोऽप्यन्य: विधातु: निर्णयम् अन्यथा कर्तुं क्षम:।

काक: - (सव्यङ्ग्यम्) अरे अहिभुक् । नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम् I

(RBSE 2022)

2. अधोलिखितस्य नाट्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं लिखत - [4M]

विदूषक: - अहं पुन: पृच्छामि। किं नामधेया युवयोर्जननी।
लव: - तस्या: द्वे नामनी।
विदूषक: - कथमिव ।
लव: - तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति ।
राम: - अपि च इतस्तावद् वयस्य । मुहूर्त्तमात्रम् ।

(RBSE 2023)

3. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत। [4M]

विदूषक: - इत इत आर्यौ !
कुशलवौ - (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य ?
राम: - युष्मद्दर्शनात् कुशलमिव । भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य । अहो हृदयग्राही स्पर्शः।
उभौ - राजासनं खल्वेतत्, न युक्तमध्यासितुम्।
राम: - सव्यवधानं न चारित्रलोपाय।

# प्रश्ननिर्माणम्

1. अधोलिखितवाक्ययो: रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - [2M]

(i) उद्यमेन सम: बन्धु: नास्ति ।

(ii) समीपे एका नदी वहति ।

(RBSE 2022)

2. अधोलिखितवाक्येषु रेखांकितपद माधृत्य प्रश्ननिर्माणं कुरुत - [3M]

i) वनराजपदाय सुपात्रं चीयते?

ii) तस्या: द्वे नामनी ।

iii) सुराधिप: ताम् अपृच्छत् ।

(RBSE 2023)

3. (i) सुराधिप: ताम् अपृच्छत् । रेखांकितपदे प्रश्ननिर्माणं कुरुत। [4M]

(ii) सर्वे प्रकृतिमातरं प्रणमन्ति। रेखांकितपदे प्रश्ननिर्माणं कुरुत।

(RBSE 2024)

# पर्याय-विलोमपदमेलनम्

1. पर्यायपदं मेलयत। [2M]

| (क) | (ख) |
|---|---|
| (i) कानने | श्रृगाल: |
| (ii) जम्बुक: | समय: |
| (iii) वेला | चन्द्र: |
| (iv) हिमकर | वने |

(RBSE 2024)

## Chapter wise PYQ Booklet/ Hard Copy



- Physics
- Chemistry
- Math/Biology
- Hindi Compulsory
- English Compulsory





**Available for Hindi & English Medium**

**Order/ Sample**

WhatsApp : 9216765400

## Chapter wise PYQ PDF



- Class 10
- Class 12 (Science Stream)
- Class 12 (Arts Stream)





**Available for Hindi & English Medium**

**Buy/Sample**

WhatsApp : 9216765400

## Free Study Material




- Sample Paper
- Short Notes
- Question Bank
- Important Question

Visit Our Website
boardzone.in

Telegram | WhatsApp Channel | YouTube

WhatsApp : 9216765400